শ্রীঃ
শ্রীমতে রামানুজায নমঃ
শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ গীতাধ্যানম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ গীতাধ্যানম্ ॥

পার্থায প্রতিবোধিতাং ভগৱতা নারাযণেন স্ৱযং
    ৱ্যাসেন গ্রথিতাং পুরাণমুনিনা মধ্যে মহাভারতম্।
অদ্ৱৈতামৃতৱর্ষিণীং ভগৱতীমষ্টাদশাধ্যাযিনীম্
    অম্ব ৎৱামনুসন্দধামি ভগৱদ্গীতে ভৱদ্ৱেষিণীম্॥ **1** ॥

নমোঽস্তু তে ৱ্যাস ৱিশালবুদ্ধে ফুল্লারৱিন্দাযতপত্রনেত্র।
যেন ৎৱযা ভারততৈলপূর্ণঃ প্রজ্ৱালিতো জ্ঞানমযঃ প্রদীপঃ॥ **2** ॥

প্রপন্নপারিজাতায তোত্রৱেত্রৈকপাণযে।
জ্ঞানমুদ্রায কৃষ্ণায গীতামৃতদুহে নমঃ॥ **3** ॥

সর্ৱোপনিষদো গাৱো দোগ্ধা গোপালনন্দনঃ।
পার্থো ৱৎসঃ সুধীর্ভোক্তা দুগ্ধং গীতামৃতং মহৎ॥ **4** ॥

ৱসুদেৱসুতং দেৱং কংসচাণূরমর্দনম্।
দেৱকীপরমানন্দং কৃষ্ণং ৱন্দে জগদ্গুরুম্॥ **5** ॥

ভীষ্মদ্রোণতটা জযদ্রথজলা গান্ধারনীলোৎপলা
    শল্যগ্রাহৱতী কৃপেণ ৱহনী কর্ণেন ৱেলাকুলা।
অশ্ৱত্থামৱিকর্ণঘোরমকরা দুর্যোধনাৱর্তিনী
    সোত্তীর্ণা খলু পাণ্ডৱৈ রণনদী কৈৱর্তকঃ কেশৱঃ॥ **6** ॥

পারাশর্যৱচঃ সরোজমমলং গীতার্থগন্ধোৎকটং
    নানাখ্যানককেসরং হরিকথাসম্বোধনাবোধিতম্।

লোকে সজ্জনষটপদৈরহরহঃ পেপীযমানং মুদা
ভূযাদ্ভারতপঙ্কজং কলিমলপ্রধ্ৱংসি নঃ শ্রেযসে॥ **7**॥

মূকং করোতি ৱাচালং পঙ্গুং লঙ্ঘযতে গিরিম্।
যৎকৃপা তমহং ৱন্দে পরমানন্দমাধৱম্॥ **8**॥

যং ব্রহ্মা ৱরুণেন্দ্ররুদ্রমরুতঃ স্তুন্ৱন্তি দিৱ্যৈঃ স্তৱৈঃ
ৱেদৈঃ সাঙ্গপদক্রমোপনিষদৈর্গাযন্তি যং সামগাঃ।
ধ্যানাৱস্থিত তদ্গতেন মনসা পশ্যন্তি যং যোগিনো
যস্যান্তং ন ৱিদুঃ সুরাসুরগণা দেৱায তস্মৈ নমঃ॥ **9**॥

॥ ইতি গীতাধ্যানম্ সমাপ্তম্॥